Postal Regd.No. GAMC- 1553/2025-2027
ISSN 2454-6313

संस्कृत-साम्प्रतम्
(Sampratam means "Current")
(संस्कृतमासिकी पत्रिका)
वर्ष : २० अङ्क : २४०
ॲप्रिल - २०२६

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad Unaccountable L1 on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

चिन्तनम्

सतीशः गज्जर्

संस्कृतेः सञ्चलनम्

संसारः गतिशीलः अस्ति इति वयं नितरां वदामः। परन्तु गतेः अपि स्थाने स्थाने भेदः दृश्यते एव। वृक्षाः वर्धन्ते। ते स्थानं न परिवर्तयन्ति। परन्तु तेषां स्थानपरिवर्तने वायुः साहाय्यं करोति। वायुः वृक्षाणां बीजानि एकस्मात् स्थानात् अन्यत् स्थानं नयति। तानि बीजानि विविधेषु स्थानेषु वृक्षरूपेण प्रादुर्भवन्ति। एवं स्थावरस्य वृक्षस्य अपि गतिः भवतिः।

मनुष्याणां वृत्तिः अपि द्विविधा भवति। स्थावरवृत्तिः जङ्गमवृत्तिः च। स्थावरवृत्तयः मनुष्याः कस्मिंश्चित् निश्चिते स्थाने वासं कर्तुम् उत्सहन्ते। ते प्रवासकष्टं न सहन्ते। ते क्वचित् चिन्तनशीलाः, विनीताः, निःस्पृहाः, गृहप्रियाः, सन्तुष्टाः वा भवन्ति। ते शान्तेः उपासकाः भवन्ति। जङ्गमवृत्तयः मनुष्याः अधिकांशेन ततः विपरीताः इव भवन्ति। अस्थिराः ते क्वचित् अधीराः अपि भवन्ति। एकस्मिन् स्थाने लाभं प्राप्नुवन्ति चेदपि ते अन्यत्र गन्तुं प्रयतन्ते। स्थानपरिवर्तनं तेषां शीलम् अस्ति। स्थावरवृत्तिभ्यः जनेभ्यः कृषिः रोचते। यतो हि कृषौ ते स्थिरतां पश्यन्ति। परन्तु जङ्गमवृत्तयः जनाः पशुपालनं कुर्वन्ति। पशुपालने सञ्चारस्य महत्त्वं भवति।

विभिन्नाः संस्कृतयः अपि द्वाभ्यां वृत्तिभ्यां विकसिताः। मुस्लिमसंस्कृतेः विकासः अश्वस्य उपरि अभवत्। अश्वः यत्र यत्र गन्तुम् अशकत् तत्र तत्र सा संस्कृतिः गता। ख्रिस्तसंस्कृतेः विस्तारः नौकायाम् अभवत्। यत्र यत्र नौका गता, तत्र तत्र सा संस्कृतिः विकसिता। एतत् द्वयं जङ्गमवृत्तेः उदाहरणम् अस्ति।

अथ आर्यसंस्कृतिः। मुस्लिमसंस्कृतिः अश्वेन विकसिता। ख्रिस्तसंस्कृतेः साहाय्यं नौका अकरोत्। आर्यसंस्कृतेः विकासः कथम् अभवत्? त्यागवृत्तितः उत्पन्नाः उत्तमाः विचाराः एव आर्यसंस्कृतेः आद्यं साधनम् आसीत्। काषायवस्त्रं भिक्षापात्रं च आर्याणां त्यागवृत्तेः प्रथमं प्रमाणम् आसीत्। अतः एव उक्तम् – 'न धनेन, न प्रजया, त्यागेनैकेन अमृतत्वमानशुः।'

स्थिरता आर्याणां स्वभावः। कृषिः, शिल्पं, गुरुकुलपरम्परा इत्यादिषु क्षेत्रेषु गहनं चिन्तनम् एव सूचयति यत् आर्याणां स्थावरे विकासे महती श्रद्धा आसीत्। एतत् स्थावरवृत्तेः उदाहरणम् अस्ति।

धर्मस्य जयः



लक्ष्मीपुरनामके ग्रामे अनुपमः नाम धनिकः वसति। सः न केवलं धनी, अपि तु विशालायाः भूमेः स्वामी अपि। दरिद्राः कृषिकाः तस्य क्षेत्रेषु कार्यं कुर्वन्तः जीवनं यापयन्ति। तेभ्यः योग्यं वेतनादिकं तेन दीयते स्म। अतः कृषिकाः अपि तं धनिकम् आदरेण पश्यन्ति स्म। एवं जीवनं सुखकरम् आसीत् तस्य।

अनुपमस्य पूर्वजाः मल्लविद्यायां प्रसिद्धाः। अनुपमोऽपि मल्लेषु अन्यतमत्वेन परिगणितः। पूर्वजानां स्मरणार्थं सः प्रतिवर्षं मल्लविद्यास्पर्धाम् आयोजयति, तत्र विजेतॄन् पुरस्कारप्रदानेन प्रोत्साहयति च। तस्य प्रसिद्धिः सर्वत्र आसीत् यत् तस्य एतदपि किञ्चन कारणम्।

समस्तपुरस्य अधीनेषु ग्रामेषु लक्ष्मीपुर–ग्रामोऽपि अन्तर्भूतः। समस्तपुरस्य भूस्वामी कृष्णभूपतिः। सः अनुपमस्य कीर्तिं श्रुतवान् आसीत्। कदाचित् सः स्वस्य सहायकम् आहूय उक्तवान् – "लक्ष्मीपुरनामकः ग्रामः अस्मदधीनः एव। तत्रत्यः अनुपमः महतीं ख्यातिं प्राप्तवान्। यदि एवमेव अनुवर्तेत तर्हि तस्य कीर्तिः इतोऽपि अधिकतया प्रसृता स्यात्। अहं नाममात्रेण भूस्वामी भवेयम्। अतः भवान् कमपि उपायं चिन्तयतु, येन अनुपमस्य सर्वं क्षेत्रं मदधीनं भवेत्" इति।

तदा सः सहायकः सविनयम् अवदत् –"आर्य, एतादृशे विषये मैत्र्या एव जयः सम्पादनीयः। अनुपमस्य पुत्री नितरां सुन्दरी। तां यदि भवतः पुत्रः परिणयेत् तर्हि भवदिष्टं सिद्धम् इव। अतः अनुपमस्य पुत्री स्नुषात्वेन परिगण्यताम्" इति।

एषा सूचना समीचीना इति अचिन्तयत् कृष्णभूपतिः। अतः सः अविलम्बेन अनुपमस्य गृहम् आगच्छत्। अनुपमः तं प्रीत्या सत्कृतवान्। ताभ्याम् आदौ ग्रामीणाः विषयाः केचन चर्चिताः किञ्चित्कालानन्तरं कृष्णभूपतिः विवाहविषयं प्रस्तुतवान्।

तदा अनुपमः हसन्– "आर्य! भवान् तु भूस्वामी। अहं तु सामान्यः। अतः मम पुत्री भवतः पुत्रस्य अनुरूपा न भवेत्। अपि च मम पुत्र्याः विवाहः मम कस्यचन मित्रस्य पुत्रेण सह भवेत् इति बहु पूर्वमेव निश्चितम्। केषुचिदेव दिनेषु विवाहः सम्पत्स्यते अपि। अतः अहं भवता क्षन्तव्यः" इति उक्तवान्।

कृष्णभूपतिः अनेन कुपितः अभवत्। तदा पार्श्वे उपविष्टः तस्य सहायकः अनुपमम् उक्तवान् – "गृहम् आगतां लक्ष्मीं दूरीकुर्वन् अस्ति मूर्खः भवान्। अपि च विवाहविषयं तिरस्कुर्वता भवता महान् प्रमादः कृतः। अस्य परिणामः किं भवता ज्ञायते ?" इति। अस्मात् वचनात् भीतः अनुपमः कम्पमानः उक्तवान् – "अस्मिन् विषये विचिन्त्य वक्तुं कश्चन कालः अपेक्षितः" इति।

भूस्वामिनः परिवारः गृहात् प्रस्थितः। ततः अनुपमः अग्रिमस्य परिणामस्य विषये अचिन्तयत्। सम्यक् विचिन्त्य सः निरणयत् – 'अत्र भयस्य कारणं किमपि नास्ति। यत्किमपि भवतु, पुत्र्याः विवाहं मम मित्रस्य पुत्रेण सहैव करिष्यामि' इति। एवं निर्णीतवान् सः समययापनं विना स्वेन निश्चितेन वरेण पुत्र्याः विवाहं निर्वर्तितवान् एव।

एतं विषयं ज्ञात्वा भूस्वामी कुपितः सन् सहायकम् आहूय –"भवतः सूचनया मया अनुपमस्य गृहं गतम्। किन्तु किं जातम्? मम तु तस्य सम्पत्तिः आवश्यकी। अतः अद्य एव घोषणं कारयतु यत् इतः परम् अनुपमस्य समग्रा सम्पत्तिः मदधीना" इति कोपेन उक्तवान्।

तदा एव तत्र आगतः भूस्वामिनः पुत्रः शक्तिवर्मा पितरम् उक्तवान् – "अनुपमः न केवलं भवतः, अपि तु ममापि अपमानं कृतवान्। मां जामातृत्वेन अनङ्गीकृत्य महान्तम् अपराधम् अपि सः कृतवान्। अतः तस्मै कथं दण्डनं दातव्यमिति अहमेव चिन्तितवान् अस्मि" इति। स्वेन चिन्तितम् उपायमपि सः पितरम् उक्तवान् – "अहं मल्लयुद्धे अजेयः अस्मि इति भवता अपि ज्ञायते। मल्लयुद्धे अहं तं वृद्धम् अनुपमं लीलया जेष्यामि। मल्लयुद्धस्य नियमानुगुणम् एव अहं स्पर्धार्थम् अनुपमम् आह्वयामि। युद्धे कश्चन समयोऽपि मया उच्यते यत् युद्धे यः जयं प्राप्स्यति सः एव अन्यस्य सम्पत्तेः प्रभुः इति। एषः मार्गः न्याय्यः फलप्रदश्च" इति।

एतदनुगुणं मल्लयुद्धस्पर्धा आयोजिता। स्पर्धार्थम् आगतान् सर्वान् मल्लान् लीलया एव जितवान् शक्तिवर्मा। ततः तेन काचन घोषणा कृता –"स्पर्धार्थिनः सर्वे चिन्तयन्ति यत् अनुपमेन सह मल्लयुद्धं भविष्यति चेत् जीवनं धन्यम् इति। अतः यदि अनुपमः मां जयेत् तर्हि तम् अहं मम समानं भूस्वामिनं परिगणयिष्यामि। यदि सः मत्तः पराजयं प्राप्नुयात् तर्हि तस्य सकला सम्पत्तिः मदधीना भवेत्। ततः सः सामान्यः जनः इव कालं यापयेत्" इति।

शक्तिवर्मणः एतानि वचनानि श्रुत्वा तत्र स्थिताः सर्वे अनुपमस्य हितैषिणः विरोधं प्रकटितवन्तः। किन्तु अनुपमः कुपितान् सर्वान् सान्त्वयन् उक्तवान् "सर्वे शान्ताः भवन्तु। अहं जानामि वृद्धस्य सतः मम स्पर्धायां भागग्रहणं न उचितम् इति। तथापि अहम् एतत् स्पर्धाह्वानं स्वीकरोमि। मम विश्वासः अस्ति यत् धर्मस्यैव जयः भवेत् इति।"

अनुपमस्य धैर्येण तेजसा च शक्तिवर्मा क्षणमात्रं निर्विण्णः। तस्य मनसि किञ्चित् भयम् अपि उत्पन्नम्। धर्मस्यैव जयः इति पदं पुनः पुनः तस्य मनसि श्रूयमाणम् आसीत्। अनुपमशक्तिवर्मणोः मल्लयुद्धं प्रारब्धम्। किन्तु प्रथमावृत्तौ एव शक्तिवर्मा भूमौ पतितः। तस्य मनसि धैर्यम् अपगतम्। अनुपमं जेतुम् अहं न प्रभवामि इत्यपि भावना तस्य मनसि जाता। तेन भयेन एव सः स्वस्य पराजयम् अङ्गीकुर्वन् अवदत् – "वयसा, बलेन, शिक्षणेन च अहमेव श्रेष्ठः। तथापि प्रथमावृत्तौ एव अहं पराजितः यत् तत् अनुपमे स्थितं धर्मबलं प्रकटयति" इति।

मल्लयुद्धस्य परिणामः एवं भवेत् इति कृष्णभूपतिः स्वप्नेऽपि न चिन्तितवान् आसीत्। तस्य विश्वासः आसीत् यत् पुत्रः जयशाली भवेदेव इति। किन्तु इदानीं जातेन अपमानेन सः खिन्नः अभवत्। तथापि किमपि कर्तुम् अशक्नुवन् सः अनुपमम् अभिनन्दनवचनानि उक्त्वा पुत्रेण सह समस्तपुरं प्रतिगतः।

अनुपमः पूर्ववत् सर्वेषाम् आदरं प्राप्य, तेषां साहाय्यं कुर्वन् बहूनि वर्षाणि सुखेन जीवितवान्।

अभिज्ञानशाकुन्तलम् (ग्रन्थपरिचयः)

व्योम शाहः

(अनुवर्तते...)

कविकुलगुरुविरचितेषु प्रबन्धेषु एकतमा कृतिः अभिज्ञानशाकुन्तलाभिख्यं नाटकम् । तत्रैतावताऽस्माभिः दृष्टं यत् मृगयार्थं मृगम् अनुगतः दुष्यन्तः वैखानसेन कण्वशिष्येण बोधितः । तदनुरोधेन पुण्याश्रमं गतस्य तस्य शकुन्तलायै स्नेहः समुत्पन्नः । कालेन तयोः परस्परम् अनुरागः गाढतरः अभवत् । इष्टिकाले आपद्भ्यः निवारणार्थं ऋषिभिः आहूतः दुष्यन्तः । तत्रैव तान् रक्षन् सः स्थितः । तत्र तयोः गान्धर्वविवाहः जातः । ततः दुर्वासोमुनिशापप्रसङ्गः । कण्वेन दैवाद् दुष्यन्तशकुन्तलयोः विषये ज्ञातम् अनुज्ञातं च । ततः शकुन्तलां सज्जीकृत्य राजकुलाय निर्गताः सर्वे आश्रमाद् निगच्छन्तः विरहदुःखम् अनुभवन्ति ।

सर्वेऽपि शकुन्तलायाः विरहेण आकुलाः । तदा कण्वः स्वीयं सङ्कल्पं प्रकटीकरोति –

सङ्कल्पितं प्रथममेव मया त्वदर्थे भर्तारमात्मसदृशं स्वगुणैर्गताऽसि ।
अस्यास्तु सम्प्रति वरं त्वयि वीतचिन्तः कान्तं समीपसहकारमिमं करिष्ये ॥

पदे पदे रुदती ससखी शकुन्तला अग्रे क्रामति । कण्वः शार्ङ्गरवम् आदिशति यत् ''मद्वचनाद् राजा वक्तव्यः –
अस्मिन् साधु विचिन्त्य संयमधनान् उच्चैः कुलं चात्मनस्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया दैवाधीनमतः परं न खलु तत्स्त्रीबन्धुभिर्याच्यते ॥''

कण्वेन शकुन्तला गुरुशुश्रूषादिकरणार्थं प्रेरिता । निर्गमकाले शकुन्तला तातं कण्वं पृच्छति यत् कदा पुनः तपोवनागमनस्य अवसरः भविष्यति, तदा सः कथयति –

भूत्वा चिराय सदिगन्तमहीसपत्नी दौःषन्तिमप्रतिरथं तनयं प्रसूय ।
तत् सन्निवेशितधुरेण सहैव भर्त्रा शान्त्यै करिष्यति पदं पुनराश्रमेऽस्मिन् ॥

गौतमी–शार्ङ्गरव–शारद्वतमिश्रैः सह शकुन्तला दुष्यन्ताय प्रस्थिता । सख्यौ कण्वः च पुनः आश्रमं प्रविष्टाः । कण्वस्य महान् तोषः जातः –

अर्थो हि कन्या परकीय एव तामेव संप्रेष्य परिग्रहीतुः ।
जातोऽस्मि सद्यो विशदान्तरात्मा चिरस्य निक्षेपमिवार्पयित्वा ॥

अनेन चतुर्थाङ्कस्य समाप्तिः भवति । इतः सर्वेऽपि शुकन्तलया सहिताः सर्वेऽपि तपोवनभागिनः प्राप्ताः राजकुलम् । तत्र कञ्चुकीयः राज्ञे निवेदयितुं याति । इतः विदूषकेन सह संलपन् राजा प्रविशति –

औत्सुक्यमात्रमवसादयति प्रतिष्ठा क्लिश्नाति लब्धपरिपालनवृत्तिरेव ।
नातिश्रमापनयनाय यथा श्रमाय राज्यं स्वहस्तधृतदण्डमिवातपत्रम् ॥

तत्र कदाचित् वीणाक्वणः श्रुतः । कञ्चुकीयः तत्र प्राप्य राजानम् अन्यासक्तं दृष्ट्वा प्रतीक्षामकरोत् ।

तदैव नेपथ्ये गीतिः उच्चारिता । तस्य प्राकृतगीतिकायाः भावः इत्थं – हे मधुकर ! अभिनवमधुलब्धः त्वं चूतमञ्जरीं कथं विस्मृतवान् ? इति । एतत् श्रुत्वा दुष्यन्तस्य मनः उत्कण्ठितम् । तदैव कञ्चुकीयः प्रविश्य तपस्विनाम् आगमनं सूचयति । नृपः तान् सत्कृत्य प्रवेशयति । प्रविशन्त्याः शकुन्तलायाः वामं नयनं स्फुरद् दुर्निमित्तं किमपि दर्शयति । कुशलवार्तानन्तरं शार्ङ्गरवेण सूचितं यत् तातेन कण्वेन युवयोः (दुष्यन्त–शकुन्तलयोः) उपयमनम् अनुज्ञातम् । दुर्वासोमुनेः शापवशेन शकुन्तलां विस्मृतवान् राजा इत्थम् आह – ''किमिदम् उपन्यस्तमिति ॥''

(क्रमशः...)

मासवार्त्ता:

सम्पन्नः भव्यः संस्कृतबालोत्सवः

एकलव्य–संस्कृत–फाउण्डेशनसंस्थानेन मार्चमासस्य २८ दिनाङ्के अमदावादनगरे गुजरात–साहित्य–परिषद्स्थाने आयोजितः भव्यः संस्कृतबालोत्सवकार्यक्रमः । अत्रोल्लेखनीयं यत् अयम् अमदावाद–नगरस्य प्रथमः संस्कृतबालोत्सवः आसीत् । कार्यक्रमेस्मिन् Skg तः १० कक्ष्यायां पठन्तः बालकाः नाटकानि, एकपात्रीयाभिनयं, संस्कृतसमूहगीतं, संस्कृताभिनयगीतं, स्वागतनृत्यं च प्रदर्शितवन्तः । कार्यक्रमस्य निखिलमपि सञ्चालनं बालकैः एव कृतम् आसीत् । कार्यक्रमस्य अन्ते कलागुरोः श्रीचन्दन–ठाकोरस्य, कलागुरोः श्रीमती–निराली–ठाकोरस्य च करकमलाभ्यां छात्रेभ्यः प्रमाणपत्रवितरणम् अपि अभवत् । अत्र उल्लेखनीयं यत् एकलव्य–संस्कृत–फाउण्डेशनसंस्थानं Skg तः आरभ्यः संस्कृतं पठितुम् इच्छुकेभ्यः सर्वेभ्यः संस्कृतवर्गान् प्रचालयति ।

कृपया हसन्तु

शिक्षकः - (रमणम् उद्दिश्य) भोः रमण ! ग्रीष्मकाले सर्वे जनाः किमर्थं छत्रं धारयन्ति ?
रमणः - आचार्य ! सूर्यदेवस्य अतिथिसत्कारं न कर्तुं जनाः छत्रं धारयन्ति ।

★ ★ ★ ★ ★

शिक्षकः - (नमनं प्रति) भोः नमन ! ग्रीष्मे कः सर्वाधिकं सुखी भवति ?
नमनः - आम्रफलविक्रेता ।

★ ★ ★ ★ ★

नमनः - (रमणं प्रति) भोः मित्र ! त्वं पुस्तकं मस्तके किमर्थं स्थापितवान् ?
रमणः - अद्य मम शिक्षकः माम् अवदत् यत् - "ज्ञानं मस्तके धारय" अतः ।

★ ★ ★ ★ ★

शिक्षकः - (नमनं प्रति) हे नमन ! बहुदिनेभ्यः पश्यन् अस्मि यत् त्वं प्रतिदिनं विद्यालयं विलम्बेन आगच्छन् असि । एवं किमर्थम् ?
नमनः - हे आचार्य ! मम मार्गे बहवः बाधकाः सन्ति । तेषां कारणादेव विलम्बः ।
शिक्षकः - के ते बाधकाः ?
नमन - प्रथमा शय्या, द्वितीया निद्रा, तृतीयम् आलस्यं च !

★ ★ ★ ★ ★

शिक्षकः - (छात्रं प्रति) त्वं किमर्थं पाठनसमये हससि ?
छात्रः - महोदय । मम मित्रं मां हास्यकणिकाम् अवदत् ।
शिक्षकः - का हास्यकणिका ? माम् अपि श्रावय ।
छात्रः - सः अवदत् यत् - "अद्य गृहकार्यं नास्ति ।"

सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

सत्यं तपो ज्ञानमहिंसतां च विद्वत्प्रणामं च सुशीलतां च ।
एतानि यो धारयते स विद्वान् न केवलं यः पठते स विद्वान् ॥

तात्पर्यम् – सत्यं, तपः, ज्ञानम्, अहिंसा, विदुषां विषये गौरवभावः, उत्तमः व्यवहारः– एते गुणाः यस्मिन् विद्यन्ते सः एव वस्तुतः विद्वान्। अधीतवान् इत्यतः मात्रं विद्वान् न भविष्यति।

सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् ।
प्रियञ्च नानृतं ब्रूयादेष धर्मः सनातनः ॥

तात्पर्यम् – सत्यं वक्तव्यं किन्तु तत् भवेत् प्रियम्। सत्यमपि अहितं यहि स्यात् तर्हि तत् न वक्तव्यम्। श्रवणाय हितमिति असत्यं न कदापि वक्तव्यम्। अयम् अस्माकं सनातनधर्मस्य सारः।

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा ।
शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः ॥

तात्पर्यम् – सत्यं, ज्ञानं, धर्मः, दया, शान्तिः, क्षमा– षडेते क्रमेण मम माता, पिता, सहोदरः, मित्रं, पत्नी, पुत्रश्च।

ज्ञानसरित्

श्यामः पटेलः

पञ्चपादी मूषकः

पशूनां विभिन्नेषु अङ्गेषु पुच्छः विशेषतां विदधाति। कतिपयपशवः दीर्घस्य पुच्छस्य साहाय्येन मशकादीन् जन्तून् दूरीकुर्वन्ति। केचन लाङ्गुलचालनेन सम्प्रेषणं कुर्वन्ति। परन्तु मुख्यतः तु पुच्छस्य आवश्यकता शरीरस्य तापमानं सम्यक् कर्तुं भवति।

किन्तु मूषकस्य पुच्छस्य किमपि कौतुकम् अस्ति। मूषकः लघुः अस्ति किन्तु पुच्छः तस्मात् दीर्घः अस्ति। मूषकः स्वस्य दीर्घे पुच्छे भ्रमतः रक्तस्य मात्रायां न्यूनताम् अधिकतां वा कृत्वा शरीरस्य तापमानं समीकरोति। यदा शीतकालो भवति तदा शैत्यवशात् पुच्छे रक्तभ्रमणं न्यूनं कृत्वा शरीरस्य उष्णता पुच्छद्वारा शरीरात् बहिः न गच्छेत् तादृशीं व्यवस्थां करोति मूषकः।

सः पुच्छस्य साहाय्येन एव स्वपादैः रज्जोः उपरि सुकरतया चलितुं क्षमः भवति। यदा सः गृहं प्रविश्य पात्रे स्थापितम् अन्नदुग्धादिकम् अश्नाति तदाऽपि पुच्छेन सन्तुलनं कृत्वा पात्रस्य धारायाम् उपविश्य स्वमुखं पात्रे नियोजयति। इत्थं मूषकस्य पुच्छः पञ्चमपादरूपेण उपयोगी भवति।

शब्दमञ्जूषा

नेदीयः	समीप	near
वल्गा	लगाम	rein
चिकित्सुः	बुद्धिमान्	wise
प्रोत्सारणम्	छुटकारा करना	getting rid of
उपनयः	निकट लाना	bringing near
मशः	मच्छर	mosquito
अवसेकः	छिडकाव	sprinkling
विप्रलम्भितः	अपमानित	insulted
नैष्ठ्यम्	स्थायित्व	constancy
समुत्पतनम्	उड़ना	flying
तलाची	चटाई	mat
धीवरः	मछुवा	fisherman
प्रसारितम्	प्रसार किया हुआ	expanded
नक्षत्री	चन्द्रमा	moon
मङ्गलीयम्	शुभ	auspicious

किं भवन्तः जानन्ति ?

१) गणगौरपर्व केन प्रान्तेन सह सम्बद्धं वर्तते ?

(क) राजस्थानेन (ख) केरलेन (ग) उडीसया (घ) कर्णाटकेन

२) एतेषु किं पर्व दक्षिणभारतेन सह सम्बद्धम् अस्ति ?

(क) लोहडी (ख) पोंगल (ग) गणगौर (घ) वैशाखी

३) मकरसङ्क्रान्तिपर्व गुजराते केन नामना प्रसिद्धं वर्तते ?

(क) दक्षिणायन (ख) पूर्वायन (ग) उत्तरायण (घ) पश्चिमायन

४) 'गरबा'कस्य प्रदेशस्य नृत्यशैली अस्ति?

(क) राजस्थानस्य (ख) महाराष्ट्रस्य (ग) गुजरातस्य (घ) पञ्जाबस्य

५) एतेषु किं नृत्यं पार्वतीदेव्याः वर्तते ?

(क) ताण्डवनृत्यम् (ख) गरबानृत्यम् (ग) कुचिपुडिनृत्यम् (घ) लास्यनृत्यम्

६) 'भरतनाट्यम्' कस्य प्रदेशस्य नृत्यशैली अस्ति ?

(क) तमिलनाडोः (ख) कर्णाटकस्य (ग) गुजरातस्य (घ) छत्तीसगढस्य

७) 'ओडिसी' कस्य राज्यस्य नृत्यशैली वर्तते ?

(क) राजस्थानस्य (ख) उडीसायाः (ग) महाराष्ट्रस्य (घ) केरलस्य

उत्तराणि – (१) क (२) ख (३) ग (४) ग (५) घ (६) क (७) ख

अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT FOUNDATION
॥ जयतु संस्कृतं जयतु भारतम् ॥

(Online/Offline)

संस्कृतभाषाशिक्षणम्

First Level

(प्राथमिकसंस्कृतम्)

Date : 1/5/26 to 27/7/26
Day : Mon-Wed-Fri
Time : 7:00am to 8:30am (IST)
Fees : ₹ 7000 $ 199 (NRI)

Second Level

Date : 1/5/26 to 27/7/26
Day : Mon-Wed-Fri
Time : 6.30pm to 8.00pm (IST)
Fees : ₹ 7000 $ 199 (NRI)

contact: Dr Mihir Upadhyay, 98246 16237

EKLAVYA SANSKRIT FOUNDATION
॥ जयतु संस्कृतं जयतु भारतम् ॥

Learn... SANSKRIT with fun ...

Eklavya Sanskrit Foundation present

SANSKRIT SUMMER CAMP

for children
(Class SKg to 8)

From 04/05/2026 to 14/05/2026
Daily 10 AM to 11.30 AM
Fees: ₹ 2500/-

Why learn Sanskrit?

Sharpens memory
Cures speech disorders
Improves pronunciation ability
Develops communication skills
Increases awareness about Indian Traditional Wisdom

Contact :
Dr. Mihir Upadhyay
+(91) 098246 16237

Venue:
Core House,
Off CG Road, Ah'bad

संस्कृत- साम्प्रतम्

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

ग्राहक शुल्कम्

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

Learn Offline

संस्कृतव्याकरणम्

(Class 9 - 10)

Date : 04/05/2026 to 14/05/2026
Day : Daily (Sunday off)
Time : 08:00 am to 9:30 am
Fees : Rs. 4000/-

contact: Dr Mihir Upadhyay, 98246 16237

प्रियवाचकाः

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

Published, Printed and Edited by Dr. Mihir Upadhyay
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
Fax: (91) 79 26563681
Mobile: (91) 98246 16237
e-mail: mihiresa@gmail.com
web: www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006